Research Journal of Samskritam and Samskriti

Volume 2 | Issue 2 | April, 2015 ISSN: 2348-1102



**Veda Vijnana Shodha Samsthanam (R.)**
(Recognized by Karnataka Sanskrit University)
Janaseva Trust, Channenahalli, Magadi Road, Bengaluru - 562130

# तिरुक्कुरल्ग्रन्थे योगशास्त्रविचाराः

डा म ।जयरामः
उपनिदेशकः गवेषणविभागः
कृष्णमाचार्ययोगमन्दिरम् चेन्नै

## सारांशिका

*तिरुक्कुरल् तमिल्साहित्यस्य प्राचीनतमेषु ग्रन्थेषु अन्यतमः। धमार्थकामानां विषये तत्र प्रतिपादितमस्ति। अनेकेषां संस्कृतभाषास्थानामार्षशास्त्रीयविचारणां तत्र साम्यं विद्यते। योगशास्त्रीयः सिद्धान्तः तदनुष्ठानसाधनानि च तास्मिन् तमिल्ग्रन्थे कथं विद्यन्ते इति परिशील्यन्ते लेखेऽस्मिन्। अस्य च लेखस्य उद्देश्येषु अन्यतमं भवति योगशास्त्रस्य प्राचीनकालादपि आभारतं प्रसृततायाः प्रदर्शनम्। इदं च उद्देश्यं साधयितुं तिरुक्कुरल्-ग्रन्थे नैके उल्लेखाः विद्यन्ते ये च लेखेऽस्मिन् प्रदर्शिताः।*

*मुख्यपदानि - तिरुक्कुरल् योगः सिद्धन्तः साधनानि तमिल्साहित्यम्*

## उपोद्घातः

तमिल्साहित्यस्य प्राचीनतमेषु ग्रन्थेषु तिरुक्कुरल्-ग्रन्थः अन्यतमः। स च ग्रन्थः तिरुवल्लुवराख्येन रचितः। अयं ग्रन्थः अरत्तुप्पाल् (धर्म-अध्यायः) पोरुट्पाल् (अर्थ-अध्यायः) कामत्तुपाल् (काम-अध्यायः) इति त्रिधा विभक्तः। एषु त्रिषु अध्यायेषु ११३ अधिकाराः (उपविभागाः) विद्यन्ते। प्रत्यधिकारं दश कुरल्-पद्यानि भवन्ति। एवञ्च अस्मिन् ग्रन्थे १३३० कुरल्-पद्यानि भवन्ति। कुरल् इत्येतत् लघौ वृत्ते रचितं पद्यप्रकारं सूचयति[१]। क्रिस्तपूर्वकालखण्डस्य अन्तिमे अथवा क्रिस्तोतरस्य कालखण्डस्य आदिमे भागे वा तिरुवल्लुवरः अवर्तत इति विदुषां मतम्[२]। तमिल्जनानां परमादरणीयोऽयं ग्रन्थः जीवनस्य

बहूनामायामानां विषये नैकान् अपूर्वान् अमूल्यांश्च विषयान् प्रस्तौति। काव्यशास्त्रादारभ्य मोक्षशास्त्रपर्यन्तानां समेषां शास्त्राणां विचारोल्लेखः ग्रन्थेऽस्मिन् परिदृश्यते। निजसमकालस्य लौकिक-आध्यात्मिक-उभयप्रकारजीवनस्य दर्पणायते अयं ग्रन्थः। अस्मिन् ग्रन्थे योगशास्त्रीयाः ये के च विचारः स्युः तानधिकृत्य किञ्चिल्लिख्यते।

योगशास्त्रं राजयोगः हठयोगः लययोगः मन्त्रयोगः कुण्डलिनीयोगः इत्येवं बहुधा विभक्तं विशालञ्च। अतः लेखेऽस्मिन् योगशास्त्रशब्देन पातञ्जलानि योगसूत्राण्येव विवक्ष्यन्ते ततो नाधिकम्। अस्यां च परिधौ विचारा यथामति वितन्यन्ते। पातञ्जलयोगसूत्राणामयं विशेषः यत् तत्र तत्वविचारैः समं तदधिगम-साधनानि च अधिकारिभेदमुररीकृत्य प्रपञ्चितानि इति। साङ्ख्यादिषु शास्त्रेषु तावत् तत्त्वज्ञानस्य विषये सुष्ठु विचारणास्ति न तु तत्साधनानां विषये। अतः अस्मिन् लेखे सिद्धान्तः तस्य प्राप्तौ साधनानि इति द्विधा विभज्य तिरुक्कुरल्-तुलनापूर्वकं योगशास्त्रीयविचारप्रस्तावः चिकीर्ष्यते। योगशास्त्रं राजयोगः हठयोगः लययोगः मन्त्रयोगः कुण्डलिनीयोगः इत्येवं बहुधा विभक्तं विशालञ्च। अतः लेखेऽस्मिन् योगशास्त्रशब्देन पातञ्जलानि योगसूत्राण्येव विवक्ष्यन्ते ततो नाधिकम्। अस्यां च परिधौ विचारा यथामति वितन्यन्ते। पातञ्जलयोगसूत्राणामयं विशेषः यत् तत्र तत्वविचारैः समं तदधिगम-साधनानि च अधिकारिभेदमुररीकृत्य प्रपञ्चितानि इति। साङ्ख्यादिषु शास्त्रेषु तावत् तत्त्वज्ञानस्य विषये सुष्ठु विचारणास्ति न तु तत्साधनानां विषये। अतः अस्मिन् लेखे सिद्धान्तः (तस्य प्राप्तौ) साधनानि इति द्विधा विभज्य तिरुक्कुरल्-तुलनापूर्वकं योगशास्त्रीयविचारप्रस्तावः चिकीर्ष्यते।

**योगसिद्धान्ताः**

**अपुनर्भवम् -**

प्रकृतिपुरुषयोः संयोगस्य हानं योगशास्त्रे कैवल्यमुच्यते। प्रकृतिपुरुषयोः संयोगस्य हेयत्वं तावत् क्लेशाजन्यकर्माशयद्वारा तस्य दुःखमयपुनर्जन्मकरत्वात्। तच्च पातञ्जले ग्रन्थे सूत्रितम् - *क्लेशमूलः कर्माशयः दृष्टादृष्टजन्मवेदनीयः* (पा २। सू १२)[३] इत्यत्र। प्रकृति-पुरुष-संयोगादिविषये तिरुक्कुरल्-ग्रन्थे उल्लेखः न वर्तते चेदपि तत्कार्यरूप-दुःखमय-पुनर्जन्मविषये तस्य निवारणविषये च नैके उल्लेखाः परिदृश्यन्ते। तद्यथा (तिरुक्कुरल्ग्रन्थस्य पद्यमयः संस्कृतानुवादः अस्मिन् लेखे उपयुक्तः। अनुवादकः श्रीरामदेशिकः (श्री।दे) उद्धृपद्यानां निकटे पद्यसङ्ख्या प्रदर्शिताः।) -

***अनुस्यूततया धर्मकार्यं जन्मनि यत्कृतम्।***
***तत्पुनर्जन्ममार्गस्य निरोधकशिलायते॥ (श्री।दे)३८।४***

अनेन च पुनर्जन्माभावः एव तिरुक्कुरल्ग्रन्थेनापि समुद्दिष्टमिति स्पष्टं प्रतीयते। प्रकरणान्तरे तदेव पुनर्जन्मराहित्यं प्रकारान्तरेण प्रपञ्च्यते -

***जन्मबाधाकराज्ञानमुक्तये मुक्तिदस्य तु।***
***ब्रह्मणो दर्शनं यत्तु तत्त्वज्ञानं तदुच्यते॥ (श्री।दे)३५८।३४***

अनेन च पुनर्जन्म अज्ञानजमिति प्रतीयते। तच्च अज्ञानं तत्त्वज्ञानेन निवर्तते इति चापि मुक्तकण्ठतया वल्लुवरेणात्र कथ्यते।

**अविद्या -**

पुनर्जन्माभावः विचारितः। पुनर्जन्म अविद्याहेतुकमिति योगशास्त्रमतम्। पुनर्जन्मकराणां क्लेशादीनां प्रसवभूमिः अविद्यैव इत्यत्र योगशास्त्रीयः सौत्रः उल्लेखः उपलभ्यते। तद्यथा - अविद्या क्षेत्रमुत्तरेषां

प्रसुप्ततनुविच्छिन्नोदाराणाम् इति (पा ।२ सू ।४)[३] तिरुवल्लुवरः अविद्याविषये स्वमतं प्रकाटयति -

*अनित्येषु पदार्थेषु नित्यताया निरूपणात्।*

*मन्दबुद्धिर्यदि भवेत् निन्दितं तस्य जीवितम्॥ (श्री ।दे )३३१*[४]

मूले तमिल्-ग्रन्थे अविद्यासूचनाय *पुल्लरिवु* इति पृथक् पदमेव तिरुवल्लुवरेण प्रयुज्यते। पुनश्च पूर्वोक्ते कुरलपद्ये योगसूत्रोक्तमेव अविद्यनिर्वचनं विद्यत इत्यवधानार्हम्। योगसूत्रेषु अविद्यानिर्वचनमित्त्थं भवति - *अनित्य-अशुचि-दुःखानात्मसु नित्य-शुचि-शुचि-सुख-आत्मख्यातिरविद्या* इति। (पा २ ।सू ५)[३]।

अनित्ये वस्तुनि नित्यत्वबुद्धिविषये सरसः दृष्टान्तः प्रदीयते तिरुवल्लुवरेण। तद्यथा -

*आयान्ति सम्पदो लोका इव नाटकमन्दिरम्।*

*निर्यान्ति सम्पदो लोका इवान्ते नाटकालयात्॥ (श्री ।दे )३३२*[४]

ईदृशेषु वित्तादिषु नित्यताबुद्धिः अविद्या इत्यभिप्रैति वल्लुवरः। इत्थञ्च मोक्षः तद्बाधिका अविद्या चेत्यनयोर्विषये चर्चितम्। इत अग्रे अविद्याजन्यानां क्लेशानां विषये विचार्यते।

**क्लेशाः -**

अविद्या-अस्मिता-राग-द्वेष-अभिनिवेशाः क्लेशाः इतीमे क्लेशाः (पा २। सू ३ )[३]। क्लेशानां विषये बोभूयन्ते विचाराः वल्लुवरस्य ग्रन्थे। तद्विषकाणि द्वित्राण्येव पद्यानि प्रदर्श्यन्ते।

*क्रोधो लोभः कठोरोक्तिसूयेति चतुर्विधान्।*

*दोषान् विना कृतं कार्यं धर्म इत्युच्यते बोधैः॥ (श्री ।दे )३५*[४]

पुनश्च क्लेशविषये कथ्यते तिरुवल्लुवरेण-

*कामः क्रोधस्तथाज्ञानमिति दोषास्त्रयो हृदि ।*

*नाम्नापि न भवेयुश्चेत् भवदुःखं विनश्यति ॥ (श्री ।दे ) ३६०*[४]

उक्तेषु क्लेशेषु आशा-अपरनामधेयः काम एव प्रधानः इति तिरुवल्लुवरस्य मतम् । तदुच्यते -

*अनुस्यूतं प्रवृत्तस्य सर्वदा सर्वजन्तुषु ।*

*संसारमयदुःखस्य बीजमाशेत्युदीर्यते ॥ (श्री ।दे ) ३६१*[४]

पुनर्जन्मनिदानभूतो राग एव वैरीति योगेश्वरेण श्रीकृष्णेनापि गीतायामाख्यातम् *काम एष* इत्यारभ्य *विद्ध्येनमिह वैरिणमित्यन्तेन* श्लोकेन । (भगवद्गीता ३।३७)[५] । अत्र कश्चन प्रश्नः । इमे क्लेशरूपा दोषाः केषां भवन्ति पण्डितानां उत पामराणामेव इति । योगशास्त्रे तावत् स्वरसवाही विदुषोऽपि तथारूढः अभिनिवेशः इत्यनेन सूत्रेण (पा २।सू ९)[१] मनुष्यमात्रस्य क्लेशाः भवन्तीत्युक्तम् । सर्वेष्वेष्वपि दोषभाक्त्वं सम्भवतीत्ययं विचारः कुरल्-ग्रन्थेऽपि उपलभ्यते । तद्यथा -

*पूर्वोक्तदोषशून्येषु पण्डिताग्रेसरेष्वपि ।*

*विचार्यमाणे त्वज्ञानं नूनं द्रष्टुं हि शक्यते ॥ (श्री ।दे ) ५०३*[४]

यत एवं अतः पण्डित-पमारादि-भेदं व्युदस्य सर्वैरपि मनुष्यैः मोक्षाय यतनीयं इति फलितोऽर्थः ।

**चतुर्व्यूहविचारः -**

क्लेशाः विचारिताः ।मनुष्येषु सर्वेष्वपि प्रसृतायाः क्लेशपरम्परायाः निवारणोपायः कः इति विचिन्त्य परमकारुणिकेन पतञ्जलिमुनिना चतुर्व्यूहव्यवस्था समादृता योगसूत्रेषु । तद्विषये योगसूत्रस्य (पादः २ सूत्रम् १५) व्यासभाष्ये अभिख्यते - यथा चिकित्साशास्त्रं चतुर्व्यूहं रोगः रोगहेतुः आरोग्यं भैषज्यमिति एवमिदमपि शास्त्रं चतुर्व्यूहमेव । तद्यथा - संसारः संसारहेतुः मोक्षः मोक्षोपायश्च

इति। यथा पतञ्जलेः चिकित्साशास्त्रीया चतुर्व्यूहपरिकल्पना आदरणीया एवं तिरुवल्लुवरः अपि स्वग्रन्थे चिकित्साशास्त्रीयां व्यूहकल्पनामेवनुसरति।

तद्यथा-

*रोगतत्त्वं परामृश्य ज्ञात्वा रोगस्य कारणम्।*

*शमनोपायमालोच्य वैद्यः कुर्यान्निवारणम्॥ (श्री।दे)९४८*[४]

अस्मिन् पद्ये तावत् रोगतत्त्वं रोगकारणम् शमनोपायः इति त्रय एवांशाः कथिताः। उत्तरत्र तेनैव रचिते पद्ये चत्वारः व्यूहाः कथ्यन्ते। तदुल्लिख्यते -

*रुग्णो भिषग् भेषजं च समये भेषजप्रदः।*

*एतच्चतुष्कसंयोगः चिकित्सेति प्रकीर्त्यते॥ (श्री।दे)९५०*[५]

चिकित्साविचारसङ्गत्या व्याधिशब्दनिर्वचनमपि परामृश्यतेऽधुना। योगान्तरायत्वेन उल्लिखितेषु नवसु व्याधिरेव प्रथमः (पा १। सू ३०)[1] योगसूत्रव्याख्यातृषु आद्यत्वेन परिगण्यमानः व्यासः व्याधिं निर्वक्ति (वात-पित्त-कफाख्य) धातुवैषम्यं व्याधिरिदमेव[६] हि योगायुर्वेदसम्मतं व्याधिनिर्वचनम् अक्षरसाम्येन तिरुकुरल् ग्रन्थेऽपि समुपलक्ष्यते -

*वातपित्तश्लेष्मरूपत्रयाणां विषमां स्थितिम्।*

*आयुर्वेदविदो व्याधिशब्देन ब्रुवते बुधाः॥ (श्री।दे)९४१*[७]

क्लेशः तन्निवाराणार्था चतुर्व्यूहव्यवस्था तत्प्रसङ्गेन व्याधिविचारः च कृतः। एषः प्रथमः भगः यत्र तिरुकुरल्-योगसूत्रयोः सैद्धान्तिकं साम्यं विचारितम्। अग्रे तावत् योगानुष्ठानसाधनानि विचार्यन्ते।

**योगसाधनानि**

**अभ्यासवैराग्ये -**

तत्रादौ योगसूत्रस्य प्रथमे पादे समाहितचित्तानां योगसाधकानाम् अभ्यासवैराग्याभ्यां तन्निरोधः (पा १ ।सू १२)[३] इत्यनेन सूत्रेण साधनद्वयं सूचितम्। तयोः प्रथमः अभ्यासः। योगशास्त्रीयः अभ्यासः तावत् चित्तनद्याः प्रशान्तवाहितायाः परिरक्षणप्रयत्नः। स च अभ्यासः कीदृशो भवेदिति विचिकित्सायां सूत्रकार एवाह – स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः इति। (पा १ ।सू १४)[३] योगशास्त्रीयस्याभ्यासस्य निर्वचनसाम्यं तिरुक्कुरल्-ग्रन्थे नोपलभ्यते चेदपि तदितिकर्तव्यता या दीर्घकालनैरन्तर्य-सूत्रे कथिता तादृशाः विचाराः नैके कुरल्पद्ये विद्यन्त एव। तद्यथा –

*विधौ ते प्रतिकूलेऽपि मा यत्नं त्यज सर्वदा।*

*अलब्धेऽपि फले कायक्लेशो नैव वृथा भवेत्॥ (श्री।दे )६१९*[४]

पुनश्च तदग्रिमे पद्ये कथयति तिरुवल्लुवरः –

*विनालस्यं कर्मलोपमन्तरा यत्नवान् नरः।*

*प्रतिकूलं विधिं चापि स कदाचित् विजेष्यति॥ (श्री।दे )६२०*[४]

इत्थमभ्यासस्य इतिकर्तव्यता विचारिता। अग्रे च वैराग्यम्। तिरुवल्लुवरस्य वैराग्यविचारः विलक्षणः विशिष्टश्च इति प्रतिभाति। तच्च इत्थम् –

*आशाविरहितावस्था मोक्ष इत्युच्यते बुधैः।*

*अवस्था सापि तत्त्वस्य ब्रह्मणो भजनाद्भवेत्॥ (श्री।दे )३६४*[४]

राग इति शब्दे प्रयोक्तव्ये तमिल्भाषाप्रभावेण आशाशब्दः अनुवादकेन प्रयुक्त इति भाति। पद्येऽस्मिन् वल्लुवरः वैराग्यमेव मोक्ष इति यदकथयत् तेन च वैराग्यस्य परमोपायत्वं द्योतयति सः। पुनश्च वैराग्यं तावत् ब्रह्मणः भजनाद् भवेदिति अनुवादकः कथयति। किन्तु मणक्कुडवर् परिमेलळगर्[५] इत्यादीनां प्राचीनानां व्याख्यातॄणां तिरुक्कुरल्-विवरणे अवलोकिते सति – रागरहितावस्था सत्यबुभुत्सया भवेत् इति कथनं उचितमिति भाति। परिमेलळगर् तावत्

एतदाधारेण कार्यकारणभावमेव सूचितं भावयति। तद्यथा - वैराग्यं सत्यबुभुत्साजन्यं सत् मोक्षजनकम् इति ॥ एवञ्च वैराग्यविषयकः अपूर्वः शास्त्रीयः अयं विषयः तिरुक्कुरल्-ग्रन्थादवगम्यते। अयमभ्यासवैराग्यविचारः।

**क्रियायोग-अष्टाङ्गयोगाः -**

क्रियायोगान्तर्गतानि तपस्स्वाध्यायेश्वरप्रणिधानानि अष्टाङ्गयोगेऽपि सन्तीत्यतः एतद्योगद्वयविषयः समेत्यैव विचार्यते। किञ्च अष्टाङ्गान्तर्गताः सर्वेऽपि अवयवाः तेनैव क्रमेण प्राचीने (साधारणयुगे पञ्चमे शतमाने) तिरुमूलरेण तमिल्भाषायां रचिते तिरुमन्दिरग्रन्थे उपलभ्यन्ते। तिरुक्कुरल्-ग्रन्थे तावत् यावन्त्युपलभ्यन्ते अङ्गानि तेषु स्थालीपुलाकन्यायेन केचनोल्लिख्यन्ते।

**यमान्तर्गता अहिंसा -**

अष्टाङ्गयोगान्तर्गते यमे अहिंसा प्रथमा प्रधाना च। तादृश्याः अहिंसायाः विषये वल्लुवरः बहुधा कथयति।

*रक्षणात् सर्वजन्तूनां दयायाश्च प्रदर्शनात्।*
*नरो न लभते नूनं दुष्कर्म नरकप्रदम्॥ (श्री।दे )२४४* इति।

भूयश्च अहिंसनस्य रोमाञ्चकं विवरणं प्रददाति वल्लुवरः। तद्यथा -

*प्राणिहिंसा विरहितं विमुखं मांसभक्षणे।*
*सर्वे देवा नराश्चैव विनमन्ति नरोत्तमम्॥ (श्री।दे )२६०*

श्लोकार्थस्तु स्पष्टः। अनुवादकेन श्लोकेऽस्मिन् विनमन्ति इत्येव पदं प्रयुक्तम्। किन्तु साञ्जलिबन्धं नमन्ति इत्यर्थप्रदं पदं प्रयोगार्हमत्र। यतो हि कैकूप्पि इति यत् तमिल्पदं पद्ये प्रयुक्तं तस्य अयमेव उचितः अर्थः। तेनैव हि अर्थेन तिरुवल्लवरस्य अहिंसाविषयकः आदरातिशयः औचित्येन अभिव्यक्तः भवति।

**यमान्तर्गतम् अस्तेयम् -**

यमान्तर्गतस्य अस्तेयस्य विषये तिरुवल्लुवरः कथयति -

*परद्रव्येष्वलुब्धा ये ज्ञानिनो धर्मवित्तमाः।*

*तान् वासयोग्यान् विज्ञाय तेष्वेव रमते रमा॥ (श्री।दे ) १७९*

अस्मिन् श्लोके न केवलमस्तेयगुणः उक्तः अपि तु अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम् (पा २। सू ३७)[१] इति योगसूत्रान्तरे यदस्तेयस्य फलं कीर्तितं तदपि सूचितं रमापरनामधेया श्रीः अस्तेयनिष्ठान् स्वयमेवाश्रयते इति कथनेन।

**क्रियायोगावयवं नियमान्तर्गतं च तपः -**

क्रियायोगाङ्गततया तपः उल्लिखितं वर्तते पतञ्जलिना। (२ सू १)[१] अष्टाङ्गयोगान्तर्गते नियमेऽपि तपः अन्तर्भवति। (पा २।सू ३२)[१] तादृशस्य तपसः विषये वल्लुवरः पद्यदशकात्मकम् अधिकरणमेव रचयामास। सः कथयति-

*जन्मान्तरतपोऽभ्यासशालिनो मनुजस्य तु।*

*तपः स्यादत्र निर्विघ्नं विपरीते वृथाश्रमः॥ (श्री।दे) २६२*

जन्मान्तरीयसुकृतवशादेव तपसि मनुष्यः प्रवर्तते इति अपूर्वं कञ्चन विषयं प्रस्तौति वल्लुवरः।

पुनश्च वल्लुवर तपसः लक्षणमेवाह -

*उपवासादिदुःखानां सहनं जीवसन्ततेः।*

*दुःखानुत्पादनं चेति तपोलक्षणमुच्यते॥ (श्री।दे) २६१ इति॥*

सदाशिवब्रह्मेन्द्रः स्वीयायां योगसुधाकराख्यायां योगसूत्रवृत्तौ अपि हितमितमेध्याशनं तपः (पा२। सू १)[८] इत्येव निर्वदन्ति तपसः लक्षणम्।

तपसः विषये पुनरेकं पद्यं यच्च प्रायः तपश्शब्दस्य दहार्थकात् सन्तापार्थकात् वा धातोः व्युत्पन्नत्वं मनसि निधाय वल्लुवरेण कृतमिति भाति। तच्च पद्यमिदमस्ति -

*असकृत्वह्निसन्तप्तं सुवर्णं सुष्ठु राजते।*

*तपःक्लेशितकायस्य ज्ञानं सम्यक् प्रकशते॥ (श्री।दे) २६७[४]॥*

एषः तपो विचारः।

**ईश्वरप्रणिधानम्**

यथा तपः नैकत्र उल्लिख्यते योगसूत्रेषु एवमेव ईश्वरप्रणिधानमपि योगसूत्रेषु असकृदुल्लेखं भजते। योगसूत्रग्रन्थस्य प्रथमे पादे (पा १।सू २३)[३] द्वितीये क्रियायोगाङ्गतया (पा। २। सू १)[३] अन्ते च अष्टाङ्गान्यतमनियमान्तर्गततया च (पा। २।सू ३२)[३] ईश्वरप्रणिधानस्य विषये पतञ्जलिना उच्यते। अनेन च अस्य योगसाधनस्य महत्त्वं व्यज्यते। ईश्वरप्रणिधानस्य महत्त्वख्यापनाय तिरुवल्लुवरः अपि ग्रन्थादावेव ईश्वरप्रणिधानपद्यदशकं रचयामास। न केवलं तावत् ईश्वरशब्दस्य यन्निर्वचनं योगसूत्रेषु विद्यते तस्य नितरां साम्यं प्रतीयते तिरुक्कुरलस्थे वर्णने। ईश्वरः कः इति तिरुवल्लुवरः कथयति -

*वीतरागस्य देवस्य रक्तः पादारविन्दयोः।*

*यो धन्यः स पुमान् लोके दुःखी नस्यात् कदाचन॥ (श्री।दे)४[४]*

वीतरागत्वं यदुक्तमीश्वरस्य तच्च ईश्वरस्य योगसूत्रोक्तं क्लेशापरामृष्टत्वद्योतकमिति (पा।१।सू १४)[३] सरलतयैव अवगम्यते।

पुनश्च वल्लुवरः ईश्वरस्य विषय आह -

*ईशं निरुपमं नित्यं यो वै शरणमाश्रितः।*

*स एव दुःखरहितो नित्यं सुखमिहाश्नुते॥ (श्री।दे) ७[४]*

अस्मिन् पद्ये तावत् ईशस्य यन्निरुपमत्वमुक्तं तत् तत्र निरतिशयं सर्वज्ञबीजम् (पा १।सू २५ )[५] इति योगसूत्रोक्तस्यैव ईश्वरनिरतिशयत्वस्य प्रतिबिम्बायते। ईश्वरप्रणिधानान्तर्गतस्य प्रणिधानस्य अर्थः - सर्वक्रियाणां परमगुरावर्पणं तत्फलसंन्यासो वा इति व्याख्यात्रा व्यासेन साधनपादे (पा २।सू १)[६] वर्ण्यते। इदमेव किल पद्योक्तम् *ईशस्य शरणाश्रयणम्* इत्यनेनापि विवक्षितम्। अतः योगशास्त्रस्य ईश्वरविषयकः यो भावः स च तिरुक्कुरल्-ग्रन्थेऽपि सन्दृश्यते इति निश्चप्रचम्। योगसूत्रस्थानाम् अभ्यासवैराग्यप्रभृति-अष्टाङ्गयोगावसानानाम् केषाञ्चन योगसाधानानां विषये तिरुक्कुरल्-ग्रन्थस्य विचारः अवलोकितः एतावता। स्वाध्यायः सत्यम् इन्द्रियनिग्रहरूपः प्रत्याहारः इत्येवमनेके योगसूत्रोक्ताः विचाराः तिरुक्कुरल्-ग्रन्थे योगसूत्रोक्तदिशा एव दृश्यन्ते। किन्तु विस्तरभिया विचारसङ्ग्रहे स्थालीपुलाकन्यायः आश्रितः। (आसनप्राणायामादयः तिरुक्कुरल्ग्रन्थे नोल्लिखिताः।)

**उपसंहारः**

तिरुक्कुरल् योगशास्त्रग्रन्थः इति निरूपयितुं नायं प्रयत्नः। ग्रन्थेऽस्मिन् यथा योगविचाराः सन्ति तथा कामविचाराः दण्डनीतिविचारा अपि सन्ति। यथा पूर्वत्रोल्लिखितं *तिरुमन्दिरम्* प्रभृतयः अनेके योगशास्त्रीया एव ग्रन्था विद्यन्ते तमिल्भाषायाम्। किन्तु सामान्यजीवनस्य नीतिनियमप्रतिपादकः तमिल्साहित्ये सर्वप्राचीनः तिरुक्कुरल्ग्रन्थः। तादृशे ग्रन्थे एव इयन्तः योगशास्त्रविचाराः सन्तीति स्फोरयितुमयं यत्नः। अनेन च योगशास्त्रस्य प्राशस्त्यं प्राचीनता सर्वादृतता च परिदीपिता भवन्ति॥ किञ्च भारतदेशेऽस्मिन् विचारैक्यम् आचारैक्यं जीवनोद्देश्यैक्यं च प्राचीनकालतः अपि आसीदित्यपि व्यज्यते अनेन। भाषा न कदापि देशेऽस्मिन् विचारविनिमयान्तरायः। आभारतं संस्कृतिरेकैव। तदभिव्यक्तिप्रकारः एव भिद्यते विभिन्नेषु प्रदेशेषु विभिन्नाभिर्भाषाभिः इति दिक्।

सङ्केतविस्तारः

पा । सू - पादः सूत्रम् श्री ।दे - श्रीरामदेशिकः

**आधारग्रन्थाः-**

1, वेण्पाविन् वगैगल् (तमिऴ् भाषायाम्) Retrieved March 29, 2015 from: http://www.tamilvu.org (Home page)

2. Mohan Lal, 1992, Encyclopaedia of Indian Literature, New Delhi, Sahitya Akademi, p.4341

३। पण्डितढुण्ढिराजशास्त्री (सम्पादकः) २००९ महर्षिप्रवरपतञ्जलिप्रणीतं योगसूत्रम् षट्टीकोपेतम् वाराणसी चौखम्बा संस्कृत संस्थान

४। श्रीरामदेशिकन् (अनुवादकः) तिरुक्कुरल् संस्कृतानुवादः Retrieved March 29, 2015 from: http://www.mediafire.com/download/sn6sxgpxdio0g09/Tirukkural_sanskrit+%28NK+Ashraff%27s+site%29.p0df

५। जयदयाल् गोयन्द्का (सम्पादकः) पुनर्मुद्रणम् २००७ भगवद्गीता गीताप्रेस्

६। काशीनाथ शास्त्री अघाशे (सम्पादकः) १९०४ पातञ्जलयोगसूत्राणि वाचस्पतिमिश्रविरचितटिकासंवलितव्यासभाष्यसमेतानि पुणे आनन्दाश्रममुद्रणालयः

७। तिरुकुरल् (परिमेलऴगर् मणक्कुडवर् इत्यनयोः व्याख्यामप्यन्तर्भाव्य पञ्चव्याख्यासमेतम्) Retrieved March 29, 2015 from; http://www.thirukkural.com/2009/01/blog-post_1818.html

सदाशिवेन्द्रसरस्वती १९९२ योगसुधाकरः श्रीरङ्गम् वाणीविलासमुद्रणालयः